22.09.20
2

ज्योतिषशास्त्रस्य प्रयोजनावसरे प्रोक्तं भास्करेण यत् – 'यो ज्योतिषं वेत्ति नरः स सम्यक् धर्मार्थकामान् लभते यशश्च'।

एवं धर्म-अर्थ-कामसाधकम् इदं ज्योतिषशास्त्रं नूनं लोके महत्त्वपूर्णमिति। न केवलम् इदं शास्त्रमेव लोकोपकारकम् अपितु ज्योतिषशास्त्रज्ञस्य दर्शनम् अपि पापनाशकं भवति। यथा —

दशदिनकृतपापं हन्ति सिद्धान्तवेत्ता, त्रिदिनजनितदोषं तन्त्रविज्ञः स एव।
करणभगणवेत्ता हन्त्यहोरात्रदोषं, जनयति च द्विमात्रं नक्षत्रसूची॥

अर्वाचीनज्योतिर्विज्ञानकारस्य मतमस्ति यत् ज्योतिष-शास्त्रेण लोकोपरि महत् उपकारः कृतः, अङ्कगणित-बीजगणित-रेखागणित-दशमलवादीनामाकारप्रकाराः पाश्चात्यदेशेषु विभिन्नरूपेण अगच्छन् तेन ज्योतिषशास्त्रम् आयुर्वेदश्च विशेषरूपेण प्रभावितौ बभूवतः।

डॉ० सुदिवर कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ।

22.09.20
1

ज्योतिषशास्त्रस्य लोकोपकारकत्वम् —

यद्भासा भासते नित्यं, जगदेतच्चराचरम् ।
तमादिपुरुषं देवं भास्करं समुपास्महे ॥

प्राचीनभारतवर्षे शास्त्रद्वयमेव बहुविश्रुतम् आसीत्, अनयोः प्रत्यक्षसम्बन्धः लोकेन सह आसीदिति । यत्रायुर्वेदशास्त्रं मानवस्य शारीरिकव्याधिं मानसिकव्याधिं च दूरीकरणार्थं प्रयतमानः दृश्यते स्म, तत्रैव ज्योतिषशास्त्रं रोगातिरिक्तमानवस्य सर्वविधकल्याणार्थं सर्वासां स्थितीनां घटनानां च शुभाशुभनिर्धारणं करोति स्म । इमे द्वे शास्त्रे लोकोपकारद्वयस्य एव आचार्यप्रवरैः प्रथितौ जातौ । ज्योतिषायुर्वेदशास्त्रं प्रायोगिकं शास्त्रं वर्तते, यतो हि अनयोः द्वयोः शास्त्रयोः परिणामं सर्वांशतया लोकं प्रभावयति । अतएव प्रोक्तं 'ज्योतिर्वैद्यौ निरन्तरौ ज्ञेयौ' इति ।

ज्योतिषशास्त्रस्य प्रयोजनावसरे आचार्यलगधेन प्रोक्तं यत् - वेद अस्माकं ज्ञानमूलं कर्ममूलञ्च, तत्रोक्तानास्यः यज्ञादयाश्च कालाश्रिताः, अतो इदं कालविधानशास्त्रम् अस्ति । यथा —

वेदाहि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ।
यस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेत्ति स वेद यज्ञान् ॥

इदं कालविधानशास्त्रं कालस्य सूक्ष्माऽवयवादारभ्य कल्पपर्यन्तकालस्य महद् अवयवस्य मीमांसा प्रस्तौति, येन लोकस्य सर्वाऽपि गणना सम्यक्तया सम्भवति । भास्कराचार्येण प्रोक्तं प्राचीनभारतवर्षे वेदोक्तकर्माचरणविषयेऽहकालज्ञानार्थं ज्योतिर्विज्ञानं प्रादुरभूत, यथा वेदवाङ्मये स्पष्टतया प्राप्यते ।

p.T.O

ग्रहचार-शकुन-दिग्दाहप्रभृतीनाम् आकाशीय-स्थितीनां ज्ञानं कृषकाणां कृते अतीवमहत्त्वपूर्णं भवति। अनेन ज्ञानेन धान्यसंरक्षणे कर्तने च सौविध्यं भवति। इदं संहिताशास्त्रं भोजनसहितावासस्य परिकल्पनायां महत्त्वपूर्णतथ्यमुपस्थापयति। कीदृशः निवासः, कुत्र च निवासः, कीदृशी भूमिः च वासयोग्या भवतीति, वास्तुसम्बन्धिसमेषां विषयाणां निर्धारणं लोकोपकारकमेव दृश्यते। जलाशयारम्भः, गृहस्समीपस्थवृक्षवेधादीनां व्यवस्था, वानस्पतिकव्यवस्था, रत्नादिपरीक्षा, लक्षणाध्याये प्रतिपादितविविधशुभाशुभ-परीक्षणमपि लोकोपकारकमेव।

होराशास्त्रस्य लोकोपकारकत्वम् —

'कललघनाङ्कुरास्थि' इत्यादितः आरभ्य मृत्युपर्यन्तं मानवस्य सर्वोऽपि शुभाशुभकालकलना अत्रोपलभ्यते। इदं होराशास्त्रं प्रतिक्षणं लोकोपकारः करोति। रुग्णजनानां ग्रहचिकित्सामाध्यमेन उपचारः, अरिष्टग्रस्तानाम् अरिष्टशमनोपायः, विविध-अशुभ योगस्य निवारणं होराशास्त्रमाध्यमेन क्रियते। जातकस्कन्धः विद्या-शारीरिकसुख-सन्तानोत्पत्ति-विवाह-आजीविकादयः विषयाः तज्जन्योपचाराश्च नित्यं लोकोपकारार्थम् एव प्रदर्शयति।

डॉ॰ सुदिष्ट कुमार
सहा॰ प्राचार्य (ज्योतिष)
रा॰ उ॰ सं॰ महावि॰ सुखसेना,
पूर्णियाँ

22.08.20
3

सिद्धान्तज्योतिषस्य लोकोपकारकत्वम् —

खगोलीयज्योतिषपिण्डानां गति-स्थिति-कला-मुगादिव्यवस्था- नवविधकालमानानि च इदानीमपि लोकव्यवस्थायाः कृते महत्त्वपूर्णः विद्यते। लोके चमत्कृतिः सूर्य-चन्द्रयोः ग्रहणं, तज्जन्यशुभाशुभनिर्धारणं लोकोपकारकमेव नूनम्।

सूर्योदय-सूर्यास्तयोः परिमाणाना चराचराणां कृते महदुपकारी दृश्यते। एवंभूतमिदं शास्त्रं खगोलीय पिण्डानां प्रत्येकक्षणस्य वैशिष्ट्यं जगति विशेषेणोपस्थापयति।

संहिताज्योतिषस्य लोकोपकारकत्वम् —

ज्योतिषशास्त्रस्य संहितास्कन्धः सर्वाधिकं लोकोपकारकं वर्तते। लोकोपकारमेव दृष्ट्वा बी॰बी॰ रमन्-महाभागेन प्रोक्तं यत् Samhita is the science of world.

संहिताशास्त्रोक्ता प्रक्रिया समस्तभूमण्डलस्योपरि सञ्जातग्रहप्रभावस्य मूल्याङ्कनं करोति। सकलेयं भूमिः कृत्तिकादिनवखण्डानि विभज्य तत्-तद् भूभागस्य तत्-तत्-सम्बन्धिनी नक्षत्राणि प्रातिनिधिकारूपाणि भवन्ति। तन्नक्षत्राधारेण भूमण्डलस्य स्थितिं ज्ञातुं शक्यते। तत्र अनावृष्टिः- वृष्टिः, भूकम्पोत्पातादयः जायन्ते, यस्य प्रभावः लोके प्रत्यक्षतया अनुभूयते।

अन्नं जगतः प्राणाः प्रावृट्कालस्य धान्नमायत्तम्।
प्रवर्षणकालिकमेघस्य वर्णनं, मेघोपरि वायुगतिसमीक्षणं,

P.T.O